# INDIAN LANGUAGE AND LITERATURE IN SANSKRIT

## Paper—I

Time : Three Hours

Full Marks : 300

**Note :**— Answer to be written in Devanagiri Script. Candidates should attempt Question **1** from Section-A and Question **5** from Section-B which are compulsory, and any **THREE** of the remaining questions, selecting at least **ONE** from each Section. All questions carry equal marks.

## SECTION—A

1. कांश्चन त्रीन् विभागान् उत्तरयत :— 20×3=60

(क) अधोनिर्दष्टा: **संज्ञा:** सोदाहरणं निरूपयत :—

(i) सर्वनाम

(ii) गुण

(iii) उपधा

(iv) सवर्ण।

(ख) अधोनिर्दिष्टेषु शब्देषु यथायथं सन्धिं सन्धिविच्छेदं वा कुरुत :—

(i) स्रष्टुराद्या

(ii) देव + ऐश्वर्यम्

(iii) वागर्थाविव

(iv) तान् + तान्

(v) भुवनेश्वरः

(vi) युष्मास्वपीतेषु

(vii) जनैः + उदाहृतात्

(viii) मन्त्रपदादिव

(ix) देवः + याति

(x) मन्नाथः।

(ग) अधोनिर्दिष्टानां समस्तपदानां लौकिकविग्रहवाक्यानि उल्लिख्य समासनामानि निर्दिशत :—

(i) अनुरूपम्

(ii) महेश्वरः

(iii) पाणिपादम्

(iv) चित्रगुः

(v) गतवयाः।

(घ) अधोलिखितानां वाक्यानां वाच्यपरिवर्त्तनं कुरुत :—

(अ) किं तया क्रियते धेन्वा

(आ) पश्यामि देवान् तव देव देहे

(इ) तनुभिः प्रपन्नः वः अवति

(ई) पूज्यन्ते हितकारिणः

(उ) जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।

2. वैदिकसंस्कृतभाषायाः वैशिष्ट्यप्रतिपादनपूर्वकं लौकिकसंस्कृतभाषया सह तस्याः तुलनां कुरुत। 60

3. संस्कृतकाव्येषु रामायणमहाभारतयोः प्रभावं वर्णयत। 60

4. नाटककारेषु भासस्य महत्वम् उपवर्णयत। 60

## SECTION—B

5. यथेच्छं त्रयः प्रश्नाः समाधेयाः :— 20×3=60

(क) षोडशसंस्काराणामनुष्ठानकालान् प्रतिपाद्य तेषां प्रयोजनं विचारयत।

(ख) मनुष्यजीवने पुरुषार्थाणां साधनं कथं विधीयते ?

(ग) शास्त्रकारैः वर्णाश्रमधर्मः कथं व्यवस्थितः ?

(घ) के गूढपुरुषाः ? गूढपुरुषाणां नियोजनं राजा कथं कुर्यात् ?

6. आस्तिकदर्शनानां नामानि प्रतिपाद्य वेदान्तदर्शनस्य संक्षिप्तपरिचयं प्रदीयताम्। 60

7. 'सामाजिकं वैषम्यम्, तत्कारणं प्रतिकारश्च' शीर्षकममुमवलम्ब्य नातिदीर्घः (प्रायः त्रिशतशब्दैः) प्रबन्धः लेख्यः। 60

8. गद्यांशममुमाश्रित्य अधःप्रदत्ताः सर्वे एव प्रश्नाः समाधेयाः :— 10×6=60

विदिशायां शूद्रको नाम राजाऽऽसीत्। एकदा चाण्डालकन्यका एकं पञ्जरस्थं शुकं तस्मै उपाहरत्। नृपेणागृहीतः स शुकस्तस्मै स्वपूर्वजन्मकथामाख्यातवान्। जन्मकाल एव मम माता मृता, तातोऽपि लुब्धकैर्मारितः, वृक्षादधः पतितं भूमौ सरन्तं मां जाबालिशिष्यान्यतमो दययोत्थाप्य स्वगुरोराश्रमं नीतवान्। जाबलिर्मद्वृत्तान्तमित्थमकथयत्। उज्जयिन्यां तारापीडो नाम राजाऽऽसीत्, तस्य स्त्री विलासवती, शुकनासश्चामात्यः। प्रौढे वयसि नृपस्य पुत्रः चन्द्रापीडो नाम जातः। शुकनासस्य सुतश्च वैशम्पायनो जातः। तौ प्राप्तवयसौ गुरुकुले

शिक्षितौ। शुकनासो राजपुत्रं यथोचितमुपदिष्टवान्। दिग्विजयप्रवृत्तो राजकुमारश्चन्द्रापीडः गन्धर्वमिथुनमनुधावन् एकुं सरोऽच्छोदं दृष्टवान्। तत्र महाश्वेता नाम कापि सुन्दरी तपःप्रवृत्ता दृष्टा, या स्ववृत्तान्त-मुक्तवती। मया पुण्डरीकनामके मुनितनये स्नेहः कृतः, स लोकान्तरं गतः, तमनुमर्त्तुकामां मां कापि दिव्याङ्गना 'भूयोऽपि युवयोः सङ्गमो भावीति' मां विबोध्य तच्छरीरं लोकान्तरमनैषीत्। महाश्वेतेव चन्द्रापीडाय कादम्बरीवृत्तमुक्तवती। कादम्बरीचन्द्रापीडयोः साक्षात्कारे जाते द्वयोरनुराग उदियाय। तदैव पितुर्दूत आगते चन्द्रापीडः स्वां राजधानीं प्रति निवृत्तः। कादम्बर्यां चन्द्रापीडविरहे देहं त्युक्तमुद्यतायां तत्सखी पत्रलेखा तां सान्त्वयित्वा चन्द्रापीडस्य समीपमागत्य तदवस्थां तस्मै न्यवेदयत्।

(क) राज्ञे चाण्डालकन्यका किमुपाहरत् ?

(ख) शुकः कस्मै स्वपूर्वजन्मवृत्तान्तमाख्यातवान् ?

(ग) राज्ञः तारापीडस्य कः परिचयः ?

(घ) कः शुकनासः ?

(ङ) दिग्विजयप्रवृत्तः चन्द्रापीडः गन्धर्वमिथुनमनुधावन् किं दृष्टवान् ?

(च) महाश्वेता कथं स्ववृत्तान्तमुक्तवती ?